## आत्मसंयमयोगः (ātma-saṁyama-yogaḥ)

| | | |
|---|---|---|
| | ॐ श्रीपरमात्मने नमः। अथ षष्ठोऽध्यायः। आत्मसंयमयोगः।<br>om śrīparamātmane namaḥ. atha ṣaṣṭho'dhyāyaḥ. ātmasaṁyamayogaḥ. | |
| 1. | श्रीभगवानुवाच।<br>अनाश्रितः कर्मफलम् कार्यं कर्म करोति यः।<br>स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः॥ | śrībhagavānuvāca<br>anāśritaḥ karmaphalam<br>kāryaṁ karma karoti yaḥ<br>sa sannyāsī ca yogī ca<br>na niragnirna cākriyaḥ |
| 2. | यं सन्न्यासमिति प्राहुः योगं तं विद्धि पाण्डव।<br>न ह्यसन्न्यस्तसङ्कल्पः योगी भवति कश्चन॥ | yaṁ sannyāsamiti prāhuḥ<br>yogaṁ taṁ viddhi pāṇḍava<br>na hyasannyastasaṅkalpaḥ<br>yogī bhavati kaścana |
| 3. | आरुरुक्षोर्मुनेर्योगम् कर्म कारणमुच्यते।<br>योगारूढस्य तस्यैव शमः कारणमुच्यते॥ | ārurukṣormuneryogam<br>karma kāraṇamucyate<br>yogārūḍhasya tasyaiva<br>śamaḥ kāraṇamucyate |
| 4. | यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।<br>सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते॥ | yadā hi nendriyārtheṣu<br>na karmasvanuṣajjate<br>sarvasaṅkalpasannyāsī<br>yogārūḍhastadocyate |
| 5. | उद्धरेदात्मनात्मानम् नात्मानमवसादयेत्।<br>आत्मैव ह्यात्मनो बन्धुः आत्मैव रिपुरात्मनः॥ | uddharedātmanātmānam<br>nātmānamavasādayet<br>ātmaiva hyātmano bandhuḥ<br>ātmaiva ripurātmanaḥ |
| 6. | बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः।<br>अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्॥ | bandhurātmātmanastasya<br>yenātmaivātmanā jitaḥ<br>anātmanastu śatrutve<br>vartetātmaiva śatruvat |
| 7. | जितात्मनः प्रशान्तस्य परमात्मा समाहितः।<br>शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥ | jitātmanaḥ praśāntasya<br>paramātmā samāhitaḥ<br>śītoṣṇasukhaduḥkheṣu<br>tathā mānāpamānayoḥ |

| | | |
|---|---|---|
| 8. | ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।<br>युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥ | jñānavijñānatṛptātmā<br>kūṭastho vijitendriyaḥ<br>yukta ityucyate yogī<br>samaloṣṭāśmakāñcanaḥ |
| 9. | सुहृन्मित्रार्युदासीन- मध्यस्थद्वेष्यबन्धुषु ।<br>साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ | suhṛnmitrāryudāsīna-<br>madhyasthadveṣyabandhuṣu<br>sādhuṣvapi ca pāpeṣu<br>samabuddhirviśiṣyate |
| 10. | योगी युञ्जीत सततम् आत्मानं रहसि स्थितः ।<br>एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ | yogī yuñjīta satatam<br>ātmānaṁ rahasi sthitaḥ<br>ekākī yatacittātmā<br>nirāśīraparigrahaḥ |
| 11. | शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।<br>नात्युच्छ्रितं नातिनीचम् चैलाजिनकुशोत्तरम् ॥ | śucau deśe pratiṣṭhāpya<br>sthiramāsanamātmanaḥ<br>nātyucchritaṁ nātinīcam<br>cailājinakuśottaram |
| 12. | तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।<br>उपविश्यासने युञ्ज्यात् योगमात्मविशुद्धये ॥ | tatraikāgraṁ manaḥ kṛtvā<br>yatacittendriyakriyaḥ<br>upaviśyāsane yuñjyāt<br>yogamātmaviśuddhaye |
| 13. | समं कायशिरोग्रीवम् धारयन्नचलं स्थिरः ।<br>सम्प्रेक्ष्य नासिकाग्रं स्वम् दिशश्चानवलोकयन् ॥ | samaṁ kāyaśirogrīvam<br>dhārayannacalaṁ sthiraḥ<br>samprekṣya nāsikāgraṁ svam<br>diśaścānavalokayan |
| 14. | प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः ।<br>मनः संयम्य मच्चित्तः युक्त आसीत मत्परः ॥ | praśāntātmā vigatabhīḥ<br>brahmacārivrate sthitaḥ<br>manaḥ saṁyamya maccittaḥ<br>yukta āsīta matparaḥ |
| 15. | युञ्जन्नेवं सदात्मानम् योगी नियतमानसः ।<br>शान्तिं निर्वाणपरमाम् मत्संस्थामधिगच्छति ॥ | yuñjannevaṁ sadātmānam<br>yogī niyatamānasaḥ<br>śāntiṁ nirvāṇaparamām<br>matsaṁsthāmadhigacchati |

| | | |
|---|---|---|
| 16. | नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।<br>न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन॥ | nātyaśnatastu yogo'sti<br>na caikāntamanaśnataḥ<br>na cāti svapnaśīlasya<br>jāgrato naiva cārjuna |
| 17. | युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।<br>युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥ | yuktāhāravihārasya<br>yuktaceṣṭasya karmasu<br>yuktasvapnāvabodhasya<br>yogo bhavati duḥkhahā |
| 18. | यदा विनियतं चित्तम् आत्मन्येवावतिष्ठते।<br>निःस्पृहः सर्वकामेभ्यः युक्त इत्युच्यते तदा॥ | yadā viniyataṁ cittam<br>ātmanyevāvatiṣṭhate<br>niḥspṛhaḥ sarvakāmebhyaḥ<br>yukta ityucyate tadā |
| 19. | यथा दीपो निवातस्थः नेङ्गते सोपमा स्मृता।<br>योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥ | yathā dīpo nivātasthaḥ<br>neṅgate sopamā smṛtā<br>yogino yatacittasya<br>yuñjato yogamātmanaḥ |
| 20. | यत्रोपरमते चित्तम् निरुद्धं योगसेवया।<br>यत्र चैवात्मनात्मानम् पश्यन्नात्मनि तुष्यति॥ | yatroparamate cittam<br>niruddhaṁ yogasevayā<br>yatra caivātmanātmānam<br>paśyannātmani tuṣyati |
| 21. | सुखमात्यन्तिकं यत्तत् बुद्धिग्राह्यमतीन्द्रियम्।<br>वेत्ति यत्र न चैवायम् स्थितश्चलति तत्त्वतः॥ | sukhamātyantikaṁ yattat<br>buddhigrāhyamatīndriyam<br>vetti yatra na caivāyam<br>sthitaścalati tattvataḥ |
| 22. | यं लब्ध्वा चापरं लाभम् मन्यते नाधिकं ततः।<br>यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते॥ | yaṁ labdhvā cāparaṁ lābham<br>manyate nādhikaṁ tataḥ<br>yasminsthito na duḥkhena<br>guruṇāpi vicālyate |
| 23. | तं विद्याद्दुःखसंयोग- वियोगं योगसञ्ज्ञितम्।<br>स निश्चयेन योक्तव्यः योगोऽनिर्विण्णचेतसा॥ | taṁ vidyādduḥkhasaṁyoga-<br>viyogaṁ yogasañjñitam<br>sa niścayena yoktavyaḥ<br>yogo'nirviṇṇacetasā |
| | हरिः ॐ। श्रीगुरुभ्यो नमः। हरिः ॐ।<br>श्रीकृष्णार्पणमस्तु॥ | hariḥ om. śrīgurubhyo namaḥ. hariḥ om.<br>śrīkṛṣṇārpaṇamastu<br>*(to be continued in the next academic year)* |